EB

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत पारंगत (एम्. ए.) बहि:स्थ

## परीक्षा: जून –२०२२

## सत्र ३ रे

**विषय: मृच्छकटिक (१ ते ३ अंक) आणि दशकुमारचरित (EB-३३१६)**

**दिनांक: २९/०६/२०२२** **गुण : ८०** **वेळ : स. १०.०० ते १.००**

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र. १. चतुर्णामनुवादं लिखत।** **(२८)**

१. लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता।

२. कामं नीचमिदं वदन्तु पुरुषाः स्वप्ने च यद्वर्धते विश्वस्तेषु च वञ्चनापरिभवश्चौर्यं न शौर्यं हि तत्।
स्वाधीना वचनीयतापि हि वरं बद्धो न सेवाञ्जलिः मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना।।

३. सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति।।

४. भूवल्लभ भवदीयमनोरथफलमिव समृद्धलावण्यं तारुण्यं भवत्पुत्रोऽनुभवति। सहचरसमेतस्य नूनमेतस्य दिग्विजयारम्भसमय एषः। तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयप्रमाणं क्रियतामिति। कुमारामाराभिरामा रामाद्यपौरुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसम् अकार्षुः। तत्साचिव्यम् इतरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते सपरिवारं कुमारं विजयाय विससर्ज।

५. ततः प्रेतपुरीमुपेत्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दण्डप्रणाममकरवम्। सोऽपि मामवेश्य चित्रगुप्तं नाम निजमाहूय तमवोचत् सचिव नैष अमुष्य मृत्युसमयः। निन्दितचरितोऽप्ययं महीसुरानिमित्तं गतजीवितोऽभूत्।

६. भूदेव एतत्कटकाधिपती राजा कस्य देशस्य किं नामधेयः किमत्रागमनकारणमस्य इति पृष्टोऽभाषत महीसुरः – सौम्य मत्तकालो नाम लाटेश्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसामान्यलावण्यं श्रावं श्रावमवधूतदुहितृप्रार्थनस्य तस्य नगरीम् अरौत्सीत्। वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तकालायादात्। तरुणीलाभहृष्टचेताः लाटपतिः परिणेया निजपुर एव इति निश्चित्य गच्छन्निजदेशं प्रति सम्प्रति मृगयादरेणात्र वने सैन्यावासमकारयत्।

**प्र. २. चतुर्णां ससन्दर्भं स्पष्टीकरणं कुरुत।** **(२४)**

१. कथमस्मिन्नपि कर्मणि कुशलता।
२. सर्वं नष्टं द्यूतेनैव।
३. पुनरपि पूर्वशरीरमनेन गम्यताम्।
४. ननु पापाः न हन्तव्यो ब्राह्मणः।
५. वेश्यासि सर्वं भज।
६. भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति।

**प्र. ३. चारुदत्तस्य अथवा वसन्तसेनायाः व्यक्तिरेखां वर्णयत।** **(१४)**

**प्र. ४. टिप्पणीद्वयं लिखत।** **(१४)**

१. दण्डिनः पदलालित्यम्

२. प्रेतपुरीवर्णनम्

३. गद्यकाव्यम्

--------------